IJNRD.ORG ISSN : 2456-4184
INTERNATIONAL JOURNAL OF NOVEL RESEARCH AND DEVELOPMENT (IJNRD) | IJNRD.ORG
An International Open Access, Peer-reviewed, Refereed Journal

# "स्वं रूपं शब्दस्याशब्दसंज्ञा", "अणुदित्सवर्णस्य चाप्रत्ययः" सूत्रयोः पदानां महाभाष्यदृशा परामर्शः

विशाल शर्मा
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
वेदव्यासपरिसरः बलाहरः

**शोधसारः**

स्वं रूपमिति सूत्रे[1] प्रत्याख्याते, सत्यपि तस्मिन् इष्टसिद्ध्यर्थं कतिचन वचनानि कर्तव्यानीति विचारः। सित्तद्विशेषाणां वृक्षाद्यर्थम्। विभाषा वृक्षमृग इत्यादिसूत्रेण समाहारद्वन्द्वस्य एकवद्भावः विधीयते। अत्र सूत्रे वृक्षस् मृगस् इति सिन्निर्देशः कर्तव्यः, विशेषग्रहणाय। स्वे पुषः इत्यत्र पिन्निर्देशः कर्तव्यः। पर्यायवचनस्य, तद्विशेषाणां, स्वस्य च रूपस्य ग्रहणाय। जित्पर्यायवचनस्यैव राजाद्यर्थमिति। तेन स्वरूपस्य विशेषाणां च ग्रहणं नास्तीति राजसभम्, चन्द्रगुप्तसभम् इति न भवति। झित्तस्य च तद्विशेषाणाञ्च मत्स्याद्यर्थम्। पक्षिमत्स्यमृगान् हन्ति इति ठक् स्वस्य, तद्विशेषाणां च सिद्ध्यति। पर्यायाणां ग्रहणं नास्ति। तेन अनिमिषान् हन्तीत्यादौ न ठक्। अणुदित्सवर्णस्य चाप्रत्ययः[2]। अविधीयमानः अण् उदिच्च स्वसवर्णस्य ग्राहकः। अप्रत्ययशब्दार्थः कः इति विचारः। अप्रत्ययादेश टित् किन्मित्सूपसंख्यानम् इत्युक्तम्। टित्किन्मित्सु टितः परिहारः उक्तः। सर्वेषामेव भाव्यमानेन सवर्णानां ग्रहणं नेति। वर्णसमाम्नायस्थानामेव परिहारः सवर्णग्राहकत्वबोधनार्थमप्रत्यय इति पर्युदास इति स्पष्टीकृतम्। सिद्धान्ती स्पष्ट्यति - अप्रत्यय इति पर्युदासः व्यर्थः सन् भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषां ज्ञापयति। अण्ग्रहणं किमर्थमिति विचारः कृतः। अनुवृत्तिनिर्देशे अस्य च्वौ इत्यादौ सवर्णग्राहकत्वं कथमिति आक्षिप्य अण् सवर्णस्येति वचनसामर्थ्यादिति समाधानमुक्तवान्। व्यक्तिपक्षे अण्ग्रहणं कार्यम्। आकृतिपक्षे अण्ग्रहणमपरिभाष्यमिति अण्पदं प्रत्याख्यातम।

**कूटशब्दाः**

सवर्णः, शब्दः, ग्रहणम्, प्रत्ययः, अप्रत्ययः, ग्राहकम्।

## प्रस्तावना

स्वं रूपं शब्दस्याशब्दसंज्ञेति सूत्रं प्रत्याख्यातम्। सत्यपि तस्मिन् क्वचित् इष्टसम्पादनाय कतिचन वचनानि कर्तव्यानि। सित्तद्विशेषाणां वृक्षाद्यर्थमिति प्रथमं विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्वबडबपूर्वापराधरोत्तराणाम्।[3] वचनम्। समाहारे द्वन्द्वः एकवत् स्यात्। अत्र सूत्रे वृक्षस् मृगस् इत्येवं रीत्या सित् निर्देशः कर्तव्यः। ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति। तेन विभाषा वृक्षमृगेति एकवद्भावः प्लक्षन्यग्रोधमिति वृक्षविशेषाणामेव भवति, न तु सामान्यस्येति भावः। सूत्रवत् एतद्वार्तिकमपि न्यायसिद्धार्थानुवादकम्। तुल्यजातीयानां द्वन्द्वः एकवद्भवतीति द्वन्द्वश्चेति सूत्रे वक्ष्यते। तरुवृक्षादीनां पर्यायाणां युगपत्

[1] अष्टाध्यायी- 1.1.68
[2] अष्टाध्यायी- 1.1.69
[3] अष्टाध्यायी- 2.4.12

प्रयोगाभावात् धववृक्षादीनां सामान्यविशेषाणां पदार्थभेदाभावेन साहित्यरूपचार्थसंभवात् विशेषाणानेव प्लक्षन्यग्रोधादीनां ग्रहणं सिद्धम्।

**पित्पर्यायवचनस्य च स्वाद्यर्थम्**[4]

द्वितीयं वचनमाह - पित्पर्यायवचनस्य च स्वाद्यर्थमिति। स्वप् इत्यादिरीत्या पिन्निर्देशः कर्तव्यः। ततो वक्तव्यम् - पर्यायवचनस्य च तद्विशेषाणां च ग्रहणं भवति, स्वस्य च रूपस्येति। किं प्रयोजनम्? स्वादिशब्दार्थम्। ततश्च स्वे पुषः इत्यत्र उक्तरीत्या त्रयाणां स्वपोषम्, रैपोषम्, धनपोषमिति णमुल् सिद्धः। वार्तिके चशब्दस्य ग्रहणात् स्वरूपस्य विशेषाणां च ग्रहणम्। इदं वाचनिकमेव। अस्यार्थस्य प्रकारान्तरेणासिद्धेः।

**जित्पर्यायवचनस्यैव राजाचर्थम्**[5]

तृतीयं वचनमाह - जित्पर्यायवचनस्यैव राजाद्यर्थमिति। राजन् ज् इत्येवं रीत्या जिन्निर्देशः कर्तव्यः। ततोः वक्तव्यम् - पर्यायवचनस्यैव ग्रहणं भवतीति। तेन सभाराजाऽमनुष्यपूर्वेत्यत्र पर्यायवचनस्यैव ग्रहणलाभात् इनसभम्, ईश्वरसभमिति सिद्धम्। स्वरूपस्याग्रहणात् राजसभमिति न भवति। तथा विशेषणवाचिनां च ग्रहणाभावात् चन्द्रगुप्तसभा इत्येव भवति, न तु तस्य क्लीबत्वम्। इदमपि वाचनिकमेव।

**झितस्य च तद्विशेषाणां च मत्स्याद्यर्थम्**[6]

चतुर्थं वचनमाह - झितस्य च तद्विशेषाणां च मत्स्याद्यर्थम्। झिन्निर्देशः कर्तव्यः। ततो वक्तव्यम् - तस्य च ग्रहणं भवति तद्विशेषाणां चेति। मत्स्याचर्थमिदं वचनम्। पक्षिमत्स्यमृगान् हन्ति इति सूत्रेण ठकि मात्स्यिकः, विशेषग्रहणे शाकुलिकः। पर्यायग्रहणं - ठक् न भवति अनिमिषान् हन्तीति। इदमपि वाचनिकमेव। अस्यैकस्य मत्स्यपर्यायवचनस्य ठक् इष्यते, मीनान् हन्ति मैनिकः।

**अण्दित्सवर्णस्य अप्रत्यय इति किमर्थम्?**

अणुदित्सवर्णस्य चाप्रत्ययः। ग्रहणकसूत्रमिदम्। गृह्गन्ति अकारादयः स्वसवर्णान् येन तत् ग्रहणकम्। प्रत्यय इति यौगिकं रूढं वेति विचारः। प्रतीयते विधीयते इति प्रत्यय इति यौगिकमिति केचित्। प्रत्ययपरं रूढमिति अन्ये। विचारः अग्रे भविष्यति। उत् इत् यस्य सः उदित्। कुचुटुतुपु एते उदितः। चकारात् स्वमित्यतः स्वमित्यनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। अत्राण् परेण णकारेण, व्याख्यानात्। अविधीयमानः अण् उदिच्च स्वसवर्णस्य ग्राहकः इति सूत्रार्थः। अप्रत्ययशब्दार्थः कः इति जिज्ञासया पृच्छति – अप्रत्यय डति किमर्थमिति। अर्थशब्दः अभिधेयपरः। किमत्र प्रत्ययशब्दः प्रतीयते विधीयते इति योगशक्त्या विधीयमानपरः उत रूढ्या प्रत्ययपर इति विशेषजिज्ञासेति भावः। रूढः प्रत्ययमात्रपरः। यस्य प्रत्ययसंज्ञा विहिता, तस्य प्रतिषेध इत्यभिप्रायेण समादधाति सनाशंसभिक्ष उः, अ साम्प्रतिके। अत्र उकारादीनां प्रत्ययत्वेन अप्रत्यय इति निषेधेन न सवर्णग्राहकत्वमिति भावः।

**अप्रत्ययादेशटिटित्किन्मित् इति वक्तव्यम्**

आक्षिपति - अत्यल्पमिदमुच्यते अप्रत्यय इति। न प्रत्ययमात्रनिषेधेन इष्टं सिध्यति। किन्त् आदेशादीनामपि सवर्णग्राहकत्वनिषेधाय अप्रत्यया-देशटिटित्किन्मित् इति वक्तव्यम्। प्रत्ययप्रतिषेधस्य सनाशंसभिक्ष उः इत्यादिकमदाहरणम्। आदेशे यथा – इदम इश्। इतः, इह। इदशब्दात् पञ्चम्यन्तात् तसिल्प्रत्यये इदमः इशादेशे इतः। पक्षे अस्मात्। इदंशब्दात् सप्तम्यन्तात् त्रलपवादतया इदमो हः इति हप्रत्यये इदम इशि इहेति रूपम्। विशेषविहितत्वात् त्यदाद्यत्वं बाधित्वा इदम इशिति आन्तर्यात् त्रिमात्रिकः आदेशः प्राप्नोति।

[4] महाभाष्यम्
[5] महाभाष्यम्
[6] महाभाष्यम्

**टिति, किति, मिति-**[7]

टिति यथा – लविता, लवितुम्। लूञ्धातोः तृचि, तुमुनि वा रूपम्। लू+तृ इति स्थिते आर्धधातुकस्येड्वलादेः इति इडागमः विधीयते। स च दीर्घोऽपि प्रसज्यते। अतः सवर्णग्राहकत्वनिषेधः। किति यथा – बभूव। भूधातोः लिटि भुवो वुग् लुङ्लिटोः इति वुगागमः। वकारः अनुनासिकोऽपि कदाचित् स्यात्। अप्रत्यय इति निषेधात् ग्राहकत्वं नास्ति। मिति यथा– हे अनड्वन्। अनडुहशब्दात् सम्बोधनप्रथमाविभक्तौ एकवचने अम् सम्बुद्धौ इति अमागमः कदाचित् आकारोऽपि स्यात्। तद्व्यावृत्त्यर्थम् अप्रत्ययादेशटित्किन्मित् इति वक्तव्यम्।

**टितः परिहारः**

टिद्ग्रहणस्य वैयर्थ्यमाह टितः परिहारः आचार्यप्रवृत्तिः ज्ञापयतीति। ग्रहोऽलिटि दीर्घः। एकाचः ग्रहेः विहितस्य इटः दीर्घः स्यात्, न त् लिटि। ग्रहीता इत्यादि। इडागमविधिनैव ग्रहणकशास्त्रबलेन दीर्घस्यापि सिद्धत्वात् पुनः तद्विधानं व्यर्थं सत् न टिता सवर्णानां ग्रहणं भवतीति ज्ञापयति। ज्ञापकत्वं निरस्यतिनैतदस्ति ज्ञापकम्। ग्रहेः दीर्घ एव न ह्रस्वः इति नियमार्थं ग्रहोऽलिटीति सूत्रमिति न तस्य प्रागुक्तज्ञापकत्वमिति भावः।

ग्रहोऽलिटि दीर्घ इति इड्विधेः प्रकृतार्थज्ञापकत्वे निरस्ते ज्ञापकान्तरमाहवृतो वेति। वृङ्वृञ्भ्याम् ऋदन्ताच्च इटः दीर्घो वा स्यात् न तु लिटि। तरीता, तरिता। अत्र सूत्रे अलिटीत्यनुवर्तनात् लिटि दीर्घनिषेधात् अन्यत्र दीर्घह्रस्वयोरुभयोः सिद्धत्वेन वाग्रहणं व्यर्थं सत् टिता सवर्णानां ग्रहणं नेति ज्ञापयति।

**भाव्यमानेन सवर्णानां ग्रहणं न-**[8]

अप्रत्ययादेश इति वचनापेक्षया लघुना उपायेन परिहारमाह – सर्वेषामेष परिहारः भाव्यमानेन सवर्णानां ग्रहणं नेति। ग्रहणमिति भावे ल्युट्। भाव्यमानेन इत्यस्य विधीयमानेनेत्यर्थः। सवर्णानामिति उभयप्राप्तौ कर्मणीति कर्मणि षष्ठी। भाव्यमानेनेति कर्तरि तृतीया। विधीयमानः सवर्णान् न गृह्णातीति परिभाषायाः अर्थः। अणुदित्सूत्रे अप्रत्यय इत्यनेन सामर्थ्यात् सूत्रप्राप्तं जातिपक्षेण प्राप्तं गुणाभेदकत्वेन च प्राप्तं नेत्यर्थः। अप्रत्यय इत्यत्र प्रत्ययपदं शास्त्रसंकेतितप्रत्ययपरम्। प्रत्यय इत्यस्य यौगिकत्वे अप्रत्यय इति पर्युदासेन, विधीयमानस्य सवर्णग्राहकत्वनिषेध इति तेनानन्तरत्वात् अणुदित्सूत्रप्राप्तस्य सवर्णग्रहणस्य निषेधेऽपि जातिपक्षप्राप्तस्य गुणाभेदकत्वपक्षप्राप्तस्य सवर्णग्रहणस्य निषेधो न सम्भवतीति तद्वारणमवश्यं परिभाषयैव कार्यमिति भावः। एवञ्च यौगिकत्वपक्षे पर्युदासस्य वैयर्थ्यमिति फलितम्। प्रत्यय इति अन्वर्था संज्ञा। येनार्थं प्रतियन्ति स प्रत्यय इति पक्षेऽपि पर्युदासस्य वैयर्थ्यमेव। प्रत्ययविधौ सवर्णग्रहणे हि दीर्घप्लुतयोरपि प्रत्ययत्वमेष्टव्यम्। परन्तु न हि तयोः अर्थस्याभिधानमस्तीति प्रत्ययत्वासंभवेन विधानासंभवात् निष्प्रयोजनतया सवर्णग्रहणं नास्तीति पर्युदासवैयर्थ्यम्।

**अनभिधानात् प्रत्ययः न सवर्णग्राहकः**

प्रत्ययपर्युदासस्य वैयर्थ्यमाक्षिपति - प्रत्यये भूयान् परिहार इति। तस्य सवर्णग्राहकत्वं कुतो नेति चेदुच्यते - अनभिधानात् प्रत्ययः सवर्णान् न ग्रहीष्यति। यान् हि प्रत्ययः सवर्णग्रहणेन गृह्णीयात्, अप्रत्यय इति पर्युदासाभावे दीर्घप्लुतयोरपि ग्रहणे तयोः प्रत्ययत्वमेष्टव्यम्। परन्तु न हि तयोः अर्थस्याभिधानमस्तीति अनभिधानान्न सवर्णग्राहकत्वमिति पर्युदासवैयर्थ्यम्। अप्रत्यय इति पर्युदासस्य प्रयोजनमाह प्रत्ययग्रहणस्य यौगिकत्वे, संज्ञापरत्वे च वैयर्थ्ये आक्षिप्ते प्रयोजनमाह- इदं तर्हि प्रयोजनमिति भाष्यम्। वर्णसमाम्नायस्थानामेव ग्राहकत्वबोधनार्थम् अप्रत्ययग्रहणमिति भाष्यार्थः। इह केचित् प्रतीयन्ते। प्रत्याहारशब्दैः अणादिभिः वर्णसमाम्नायस्थाः प्रतीयन्ते = बोध्यन्ते। तैः ह्रस्वैः वर्णसमाम्नाये अनिर्दिष्टा दीर्घाः प्रत्याय्यन्ते, अण्त्वेन सवर्णग्राहकसूत्रबलात्।

**प्रत्याय्यमानानां ग्राहकत्वं न**

अप्रत्यय इति पर्युदासेन प्रत्याय्यमानानां दीर्घाणां सवर्णग्राहकत्वं नेति निषिध्यते। अतः अष्टन आ विभक्तौ इत्यादौ आकारादीनां सवर्णग्राहकत्वं नास्ति। एवञ्च अप्रत्यय इति पर्युदासेन प्रत्याय्यमानानां सवर्णग्राहकत्वं नेति सिद्धम्। आक्षिपति - कं पुनः दीर्घः सवर्णग्रहणेन गृह्णीयात्? ह्रस्वम्। निराकरोति-

---

[7] अष्टाध्यायी- 1.1.46
[8] परिभाषेन्दुशेखरः- 19

यत्नाधिक्यात् न ग्रहीष्यति। दीर्घस्य द्विमात्रिकत्वेन ह्रस्वस्य एकमात्रिकत्वात् ग्रहणं न भविष्यति। दीर्घः सवर्णग्रहणेन कं गृह्णीयादित्याक्षेपस्य समाधानान्तरमाहप्लुतं तर्हि गृह्णीयादिति। तदपि निराकरोति - अनण्त्वात् न ग्रहीष्यतीति। अणुदित्सूत्रे अण्ग्रहणेन वर्णसमाम्नायस्थानां ग्रहणात् तेषामेव सवर्णग्राहकत्वम्। प्रत्याय्यमानस्य सवर्णग्राहकत्वस्याभावेन अप्रत्ययग्रहणं व्यर्थम्।

**ज्ञापकत्वम्**

सिद्धान्ती समादधाति - अप्रत्ययग्रहणं व्यर्थं सत् भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषां ज्ञापयति। एकदेशानुमतिद्वारा सर्वांशेभाव्यमानेन सवर्णानां ग्रहणं नेति सम्पूर्णां परिभाषां ज्ञापयतीति भावः।

**अण्ग्रहणं किमर्थम्?**

जातिपक्ष इति पक्षद्वयमस्ति। तत्र व्यक्तिपक्षे सर्वासां व्यक्तिपक्षः ग्रहणलाभाय अण्ग्रहणस्य आवश्यकत्वेऽपि जातिपक्षे अकारादिव्यक्तीनां अणादिप्रत्याहारेषु, अस्य च्वौ इत्यादिषु अत्वादिजात्यवच्छिन्नानां सर्वेषां ग्रहणलाभात् अण्ग्रहणं मास्तु। उदित्सवर्णस्य चाप्रत्यय इत्येव भवत्विति। आक्षिपति किमर्थमिदमुच्यते इति। सम्पूर्णं सूत्रं किमर्थमिति न प्रश्नः। उगिद्ग्रहणस्य सवर्णग्रहणाय आवश्यकत्वात्। चुत्वादिजातीनां प्रसिद्धत्वं नास्ति। अतः सूत्रघटकम् अण्ग्रहणं किमर्थमिति प्रश्नकर्तुराशयः।

**अण्ग्रहणप्रयोजनम्-**[9]

अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात्। स्वरभेदात् आनुनासिक्यभेदात्, कालभेदाच्च अकारादिव्यक्तयः अनन्ता इति तेषां ग्रहणं यथा स्यादिति अण् सवर्णस्येत्युच्यते इत्यर्थः। स्वरादिभेदात् अण् स्वसवर्णान् न गृह्णीयात्। तत्र तेषां ग्रहणमिष्यते। विना यत्नं सवर्णग्राहकत्वं न सिध्यतीति तदर्थम् अण् सवर्णस्येत्युच्यते इति भावः। उक्तं प्रयोजनमङ्गीकुर्वन् आक्षिपति – अस्ति प्रयोजनमेतत्? किं तर्हि – तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमन्पदेशात् इति। यत्र यत्र प्रत्याहाराः निर्दिश्यन्ते, तत्र प्रत्याहारनिर्देशितस्थले प्रत्याहारबोध्याकारादिभिः सवर्णानां ग्रहणं न स्यात्। अनुपदेशात् अनुच्चारणात्। यथा अकः सवर्णे दीर्घः इति सूत्रे अक् अच् इत्युभौ प्रत्याहारौ निर्दिष्टौ। तत्र अकारः साक्षादुच्चारितः। सवर्णग्राहकत्वं स्यात्। प्रत्याहारबोध्यानाम् इकारादीनां तस्यैव साक्षादुच्चरितत्वाभावेन तेषां सवर्णग्रहणं न स्यात् इति इदमेकं व्याख्यानम्। अक्षरसमाम्नाये दीर्घादीनामनुपदेशात् अकारादिभिः दीर्घादीनां ग्रहणं न स्यात्। यथाजातीयकानां संज्ञा कृता, तथाजातीयकानां सम्प्रत्यायिका स्यात्। ह्रस्वानामुपदेशात् तेषामेव ग्रहणं स्यात्, न तु दीर्घादीनामिति अन्यद् व्याख्यानम्। प्रकृतभाष्यसन्दर्भेण इदमेव ग्राह्यमिति बोध्यम्।

**दीर्घादीनां ग्राहकत्वम्-**

ननु च ह्रस्वाः प्रतीयमानाः अनgपदिष्टानपि दीर्घान् सम्प्रत्याययिष्यन्ति इति समाहिते पुनराक्षिपति - ह्रस्वसम्प्रत्ययादिति चेत् उच्चार्यमाणशब्द-सम्प्रत्यायकत्वात् शब्दस्यावचनम् इति। ह्रस्वैः संप्रत्ययः ह्रस्वसंप्रत्यय इति तृतीयातत्पुरुषः। प्रतीयमानैः अर्थात् प्रत्याहारबोध्यैः अकारादिभिः दीर्घाः संप्रत्याय्यन्ते इति वक्तुं न शक्यते। उच्चार्यमाणानामेव सम्प्रत्यायकत्वात्। अतः शब्दस्य अवचनम् = प्रतीयमानेन अकारादिना दीर्घादीनां प्रत्यायनं नास्ति। यथा इत्युक्ते सम्पाठमात्रम् – पठ्यमानः अग्निमीले ऋक् इत्याचानुपूर्वीविशेषविशिष्टपदसमूहः बोध्यते, न तु अस्याः अर्थः गम्यते। एवं प्रकृतेऽपि अनुच्चारितस्य प्रत्यायकत्वं नास्ति इति।

**समाधानम्**

एवं तर्हि वर्णपाठ एव उपदेशः करिष्यते इति समादधाति। अस्य ग्रन्थस्यायमाशयः। अणुदित्सूत्रेण अकारादिभिः आकारादीनाम् उपदेशः प्रत्यायनं वर्णपाठे एव भवतीति करिष्यते व्याख्यास्यते इति। तथा व्याख्यानेन अकारादिभिः ह्रस्वैः प्रतीयमानैः दीर्घाणां प्रत्यायनं भवतीति सिद्धमिति। एवं समाहिते पुनराक्षिपति वर्णपाठे उपदेश इति चेत् अवरकालत्वात् परिभाषायाः इति। परिभाषायाः अणुदित्सवर्णस्येति ग्राहकसूत्रस्य अवरकालत्वात्=वर्णोपदेशानन्तकालिकत्वात् प्रत्याहारसूत्रकाले तस्यानिष्पत्त्या तेन वर्णपाठे दीर्घाणां प्रत्यायनं कर्तुमशक्यम्। एवञ्च वर्णपाठे उपदेश इति समाधानं निराकृतम्।

[9] महाभाष्यम्

**आक्षेपः समाधानञ्च-**

पुनराक्षिपति - किं परा सूत्रात् क्रियते इति अवरकालेति। प्रत्याहारसूत्रात् अइउण् इत्याद्यपेक्षया परस्मिन् काले क्रियते इति हेतोः अवरकालैवेति। समादधाति - नेत्याह सर्वथा अवरकालैवेति। न केवलमुपदेशोत्तरमिति हेतोः, अर्थक्रममनुसृत्यापि अवरकालैव। वर्णानामुपदेशस्तावत्। उपदेशोतरकाला इत्संज्ञा, इत्संज्ञोत्तरकालः आदिरन्त्येन सहेतेति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा, सवर्णसंज्ञोतरकालम् अणुदित्सवर्णस्येति ग्राहकसूत्रमिति क्रमः। एवञ्च अवरकालत्वात् वर्णपाठे ग्राहकसूत्रेण ह्रस्वाः दीर्घान् प्रत्याययन्तीति वकुं न शक्यते। तस्मादुपदेशः कर्तव्यः। यतः ग्राहकसूत्रेण प्रत्याहारस्थाकारादिभिः दीर्घाः न गृह्यन्ते, तस्मात् अङ्ठण् इत्यादौ दीर्घप्लुता अपि पठनीया इति। व्यक्तिपक्षमाश्रित्य ग्रन्थोऽयं प्रवृत्तः। प्रत्याहारेषु अण् सवर्णस्येत्यस्य प्रयोजनाभावः उक्तः।

**अनुवृत्तिनिर्देशे ग्राहकत्वं न स्यात्-**

अनुवृत्तिनिर्देशे अस्य च्वौ इत्यादौ अण् सवर्णस्येत्यस्य प्रयोजनाभावमाह- तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् इति। वृत्तिं= वर्णसमाम्नायम् अनुगतः अनुवृत्तिः अकारादिः। तस्य निर्देशः, स्वरूपेणोच्चारणम्। तत्सदृशः अनुवृत्तिनिर्देशे = अस्य च्वौ इत्यादौ अकारादेः सवर्णग्राहकत्वं न प्राप्नोति। तत्र हेतुमाह अण्त्वादिति। न ह्येते अणः ये अनुवृत्तिनिर्देशे। के तर्हि? ये अक्षरसमाम्नाये उपदिश्यन्ते। एवञ्च प्रत्याहारसूत्रस्थाकारायपेक्षया अस्य च्वौ, यस्येति च इत्यादिसूत्रस्थस्याकारादिव्यक्तेः भिन्नत्वात् अनण्त्वेन सवर्णग्रहणं न प्राप्नोति। आक्षेपं परिहरति - एवं तर्हि अनण्त्वात् अस्य च्वौ इत्यादौ, अनुपदेशात् =अनुच्चारणात् प्रत्याहारसूत्रेण अणः स्वसवर्णानां ग्राहकत्वं नसिद्ध्यति। उच्यते च अण् सवर्णान् गृह्णातीति। अण् सवर्णस्येति वचनसामर्थ्यात् अण्सदृशः अण्ग्रहणेन ग्रहीष्यते इति सवर्णग्राहकत्वं सिद्धम्।

**वचनादित्युक्तौ आपेक्षः-**

वचनसामर्थ्यात् न लभ्यते इति आक्षिपति - वचनायत्र तन्नास्तीति। अनुच्चार्यमाणत्वम् अनण्त्वं चोभयं यत्र नास्ति, तत्र अण् सवर्णस्येति सवर्णग्राहकत्वं सिध्यतीति वचनस्य चारितार्थ्येन तत्सामर्थ्यादिति कल्पनमयुक्तम्। चारितार्थ्यं प्रदर्शयति - य एते प्रत्याहाराणामादितः वर्णा तैः सवर्णानां ग्रहणं यथा स्यादिति। यथा अकः सवर्णे दीर्घः इत्यादौ अक् अच् इत्यादिप्रत्याहारस्थले अनुबन्धेन ककारादिचिह्नेन प्रत्याहारस्थ एव निर्दिष्ट इति प्रत्यभिज्ञानात् तत्र सवर्णग्राहकत्वस्य सिद्धत्वेन अण्सवर्णस्येति वचनस्य चारितार्थ्येन वचनसामर्थ्यादिति वकुमशक्यत्वेन अस्य च्वौ इत्यादौ सवर्णानां ग्रहणं न प्राप्नोतीति दोषः तदवस्थ एव।

**सवर्णेऽण्ग्रहणमपरिभाष्यम्-**

आकृतिपक्षाश्रयणेन अण्ग्रहणप्रत्याख्यानपूर्वकं सिद्धान्तं दर्शयति– एवं सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् इति। तर्हि। सवर्णग्राहकसूत्रे अणुदित्सवर्णस्येत्यत्र अण्ग्रहणं न कर्तव्यम्, आकृतिग्रहणादित्यर्थः।जातिपक्षाश्रयणेन अत्वादिजात्यवच्छिन्नस्य ग्रहणेन इष्टसिद्धौ तदर्थमण्ग्रहणं न कार्यमिति भावः। तदेवोक्तम् – अवर्णाकृतिः उपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथा इवर्णाकृतिः, तथा उवर्णाकृतिः। अस्य च्वौ इत्यादौ सर्वत्र जातिः निर्दिश्यते। जातेः साक्षात् उच्चारणासम्भवात् नान्तरीयकत्वेन व्यक्तेरुच्चारणम्।

अकाराकारयोः जातिभेदं मन्यमानः आक्षिपति - नन् चाऽन्या आकृतिः अकारस्य, अन्या आकारस्येति। आक्षेपं परिहरति - अनन्यत्वाच्चेति। श्रवणभेदेन अकाराकारयोः भेदानुभवेऽपि स च भेदः न जातिभेदसाधकः। ततश्च अकाराकृतेः स आकाराकृतेश्च भेदो नास्तीति फलितम्।

**ह्रस्वदीर्घयोः आकृतिभेदो नास्ति-**

ह्रस्वदीर्घयोः आकृतिभेदाभावं समर्थयति - अनेकान्तो हि अनन्यत्वकरः। अनेकान्तेन = अनियमेन भेदः अनन्यत्वकरः न भवति। कदाचिभेदः कदाचिद्भेदः यत्र प्रतीयते सः भेदः अनियतः। सः अन्यत्वकरः न भवति। यथा कृष्णगौः, कपिलगौः इत्युक्ते गुणकृतः भेदः, गौः, गौः इति प्रतीत्या अभेद इति अभेदसमानाधिकरणः भेदः नान्यत्वकरः। गोत्वाश्वत्वाभ्यां यत्र नितान्तः भेदः, स एवान्यत्वकरः। प्रकृते ह्रस्वे दीर्घे च अवर्ण इत्येकाकारा बुद्धिः जायत इति पाठान्तरम्।

**उक्तवार्तिकस्य पाठान्तरम्-**

सवर्णेऽण्ग्रहणमिति[10] वार्तिकस्य पाठान्तरम् अपर आहेत्यादिना दर्शयति। सवर्णेऽण्ग्रहणमपरिभाष्यम् आकृतिग्रहणादनन्यत्वम्। पूर्ववार्तिके आकृतिग्रहणात् आकृतिपक्षाश्रयणेन सवर्णग्राहकसूत्रे अण्ग्रहणमपरिभाष्यम् इति साध्यते। पूर्वकल्पे आकृतिग्रहणादिति जातिमात्रस्य प्राधान्यमुक्तम्। अत्र कल्पे व्यक्तिरेव शक्यः। जातिस्तु शब्दजन्यप्रतीतिविशेष्यत्वाभावेऽपि अभेदप्रत्ययहेतुरस्तीति तज्जात्याक्रान्तसर्वव्यक्तीनां ग्रहणं सिध्यति। अत्र कल्पे अण्ग्रहणाकरणे सर्वव्यक्तीनामनन्यत्वं हेतुं, अनन्यत्वे आकृतिग्रहणं हेतुः। आकृतिश्च विशेषणत्वेनाश्रीयते इति बोध्यम्।

**उपसंहारः-**

**उपसंहारः**

पाणिनीयव्याकरणपरम्परायां स्वं रूपम् इति सूत्रं शब्दस्य स्वकीयस्वरूपस्य ग्रहणविषये मूलभूतं सिद्धान्तं प्रतिपादयति। महाभाष्यकारः पतञ्जलिः “रूपग्रहणं किमर्थम्?” इति प्रश्नं समुत्थाप्य सूक्ष्मतया विचारयति। केवलं “स्वं शब्दस्याशब्दसंज्ञा” इत्युक्तेऽपि कार्यसिद्धिः सम्भवति, तथापि पाणिनिना “रूप” इति पदस्य ग्रहणं कृतम्। महाभाष्यकारस्य मते अनेन आचार्यस्य ज्ञापनं भवति यत् शब्दस्य स्वं रूपं केवलं ध्वनिरूपं न, अपि तु तदतिरिक्तमपि किञ्चित् तत्त्वं विद्यते। तदेव अर्थः। अतः शब्दस्य स्वरूपग्रहणे शब्दरूपस्य अर्थवत्त्वमपि सूचितं भवति। एतादृशेन ज्ञापनेन “अर्थवद्ग्रहणे नानर्थकस्य” इति परिभाषायाः पृथग् विधानस्य आवशयकता न भवतीति महाभाष्यकारस्य अभिप्रायः। अस्य सूत्रस्य अन्यद् महत्त्वपूर्णं वैशिष्ट्यम् अस्ति यत् “अशब्दसंज्ञा” इति पदेन व्याकरणशास्त्रे प्रयुक्तानां पारिभाषिकसंज्ञाशब्दानां सामान्यशब्देभ्यः भेदः सूचितः भवति। सामान्यशब्दः स्वकीयमेव रूपं बोधयति; परन्तु व्याकरणशास्त्रे संज्ञारूपेण प्रयुक्तः शब्दः स्वस्य सामान्यरूपार्थं न बोधयित्वा शास्त्रनिर्दिष्टं विशिष्टं तत्त्वं बोधयितुम् अर्हति। अतः पाणिनीयव्यवस्थायां शब्दरूपम्, अर्थः, संज्ञा च परस्परसम्बद्धानि सन्ति, किन्तु तेषां कार्यक्षेत्रं पृथक् पृथक् भवति।

“अणुदित्सवर्णस्य चाप्रत्ययः” इति सूत्रेण पूर्वसूत्रे प्राप्तस्य शब्दस्वरूपग्रहणस्य विशेषः नियमः प्रतिपाद्यते। अत्र अण् तथा उदित् इत्येतयोः ग्रहणेन तेषां सवर्णानामपि ग्रहणं भवति, किन्तु प्रत्ययरूपे प्रयोगे तादृशं सवर्णग्रहणं न भवति। अस्मिन् सूत्रे “अप्रत्ययः” इति पदस्य प्रयोजनं महाभाष्यकारः विशेषतः विवृणोति। “अप्रत्ययः इति किमर्थम्?” इति प्रश्नस्य माध्यमेन प्रत्ययस्थले सवर्णग्रहणस्य अतिप्रसङ्गः निवार्यते। महाभाष्ये “सनाशंसभिक्ष उः” तथा “अ साम्प्रतिके” इत्यादिभिः उदाहरणैः अस्य निषेधस्य प्रयोजनं प्रदर्शितम्। महाभाष्यकारः केवलं “अप्रत्ययः” इत्येतावत् कथनं पर्याप्तं न मन्यते; प्रत्यय, आदेश, टित्, कित्, मित् इत्यादीनां सन्दर्भेऽपि सवर्णग्रहणस्य मर्यादा विवेचिता भवति। विशेषतः टित्-प्रत्ययादिषु सवर्णग्रहणस्य प्रसङ्गः तथा आचार्यप्रवृत्त्या तस्य नियमनं महाभाष्यस्य तर्कप्रधानं वैशिष्ट्यम् अस्ति।

अतः “स्वं रूपं शब्दस्याशब्दसंज्ञा” इति सूत्रं शब्दस्य स्वकीयस्वरूपस्य आधारभूतं विधानं करोति, “अणुदित्सवर्णस्य चाप्रत्ययः” इति सूत्रं तस्य ग्रहणस्य व्यावहारिक-व्याकरणिकसीमां निर्धारयति। एवं पतञ्जलिमहाभाष्यस्य तर्कपरम्परायां सूत्रद्वयमिदं पाणिनीयशब्दशास्त्रस्य सूक्ष्मतां, तार्किकतां, नियमबद्धतां च प्रकाशयति।

**सन्दर्भग्रन्थसूची-**


- *पाण्डेय गोपालदत्त 2008. अष्टाध्यायी । वाराणसी: चौखम्बा सुरभारती प्रकाशन।*
- *अभ्यङ्कर के. वी 2006. व्याकरणमहाभाष्यम् । पुणे: भाण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्यूट।*
- *चतुर्वेदी गिरिधर शर्मा एवं शर्मा परमेश्वरानन्द 2008. वैयाकरणसिद्धान्तकौमुदी । वाराणसी: मोतीलाल बनारसीदास।*
- *पञ्चोली बालकृष्ण 2007. लघुशब्देन्दुशेखरः। वाराणसी: चौखम्बा संस्कृत प्रतिष्ठान।*
- *शर्मा काशीनाथ 2010. पाणिनीयव्याकरणे कारकप्रकरणम्। वाराणसी: चौखम्बा सुरभारती प्रकाशन।*
- *Joshi, S. D., & Roodbergen, J. A. F. 1986. Patañjali's Vyākaraṇa-Mahābhāṣya: Kārikā and Bhāṣya. Pune: University of Poona.*
- *Kielhorn, F. 1880–1885. The Vyākaraṇa-Mahābhāṣya of Patañjali. Bombay: Government Central Press.*


[10] महाभाष्यम्- वार्तिकम्